# .. pingalAgItA ..

# ॥ પિઙ્ગલાગીતા ॥

## Document Information

Text title : pingalagItA

File name : pingalagiitaa.itx

Category : gItA

Location : doc_giitaa

Language : Sanskrit

Subject : religion

Transliterated by : Professor Tokunaga in Kyoto system(?)

Proofread by : Sunder Hattangadi(sunderh at hotmail.com)

Latest update : June 2, 1998

Send corrections to : Sanskrit@cheerful.com

Site access : http://sanskritdocuments.org

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted for promotion of any website or individuals or for commercial purpose without permission.

Please help to maintain respect for volunteer spirit.

August 2, 2016

*sanskritdocuments.org*

# ॥ પિઙ્ગલાગીતા ॥

અધ્યાયઃ ૧૬૮
ય્
ધર્માઃ પિતામહેનોક્તા રાજધર્માશ્રિતાઃ શુભાઃ ।
ધર્મમાશ્રમિણાં શ્રેષ્ઠં વક્તુમર્હસિ પાર્થિવ ॥ ૧॥

ભીષ્મોવાચ
સર્વત્ર વિહિતો ધર્મઃ સ્વર્ગ્યઃ સત્યફલં તપઃ ।
બહુ દ્વારસ્ય ધર્મસ્ય નેહાસ્તિ વિફલા ક્રિયા ॥ ૨॥

યસ્મિન્યસ્મિંસ્તુ વિનયે યો યો યાતિ વિનિશ્ચયમ્ ।
સ તમેવાભિજાનાતિ નાન્યં ભરતસત્તમ ॥ ૩॥

યથા યથા ચ પર્યેતિ લોકતન્ત્રમસારવત્ ।
તથા તથા વિરાગોઽત્ર જાયતે નાત્ર સંશયઃ ॥ ૪॥

એવં વ્યવસિતે લોકે બહુદોષે યુધિષ્ઠિર ।
આત્મમોક્ષનિમિત્તં વૈ યતેત મતિમાન્નરઃ ॥ ૫॥

ય્
નષ્ટે ધને વા દારે વા પુત્રે પિતરિ વા મૃતે ।
યયા બુદ્ધ્યા નુદેચ્છોકં તન્મે બ્રૂહિ પિતામહ ॥ ૬॥

ભીષ્મોવાચ
નષ્ટે ધને વા દારે વા પુત્રે પિતરિ વા મૃતે ।
અહો દુઃખમિતિ ધ્યાયઞ્શોકસ્યાપચિતિં ચરેત્ ॥ ૭॥

અત્રાપ્યુદાહરન્તીમમિતિહાસં પુરાતનમ્ ।
યથા સેનજિતં વિપ્રઃ કશ્ચિદિત્યબ્રવીદ્વચઃ ॥ ૮॥

પુત્રશોકાભિસન્તપ્તં રાજાનં શોકવિહ્વલમ્ ।
વિષણ્ણવદનં દૃષ્ટ્વા વિપ્રો વચનમબ્રવીત્ ॥ ૯॥

કિં નુ ખલ્વસિ મૂઢસ્ત્વં શોચ્યઃ કિમનુશોચસિ ।
યદા ત્વામપિ શોચન્તઃ શોચ્યા યાસ્યન્તિ તાં ગતિમ્ ॥ ૧૦॥

ત્વં ચૈવાહં ચ યે ચાન્યે ત્વાં રાજન્પર્યુપાસતે ।
સર્વે તત્ર ગમિષ્યામો યત એવાગતા વયમ્ ॥ ૧૧॥

સેનાજિતોવાચ
કા બુદ્ધિઃ કિં તપો વિપ્ર કઃ સમાધિસ્તપોધન ।

કિં જ્ઞાનં કિં શ્રુતં વા તે યત્પ્રાપ્ય ન વિષીદસિ ॥ ૧૨॥

બ્રાહ્મણોવાચ
પશ્ય ભૂતાનિ દુઃખેન વ્યતિષક્તાનિ સર્વશઃ ।
આત્માપિ ચાયં ન મમ સર્વા વા પૃથિવી મમ ॥ ૧૩ ॥

યથા મમ તથાન્યેષામિતિ બુદ્ધ્યા ન મે વ્યથા ।
એતાં બુદ્ધિમહં પ્રાપ્ય ન પ્રહૃષ્યે ન ચ વ્યથે ॥ ૧૪॥

યથા કાષ્ઠં ચ કાષ્ઠં ચ સમેયાતાં મહોદધૌ ।
સમેત્ય ચ વ્યપેયાતાં તદ્વદ્ભૂતસમાગમઃ ॥ ૧૫॥

એવં પુત્રાશ્ચ પૌત્રાશ્ચ જ્ઞાતયો બાન્ધવાસ્તથા ।
તેષુ સ્નેહો ન કર્તવ્યો વિપ્રયોગો હિ તૈર્ધ્રુવમ્ ॥ ૧૬॥

અદર્શનાદાપતિતઃ પુનશ્ચાદર્શનં ગતઃ ।
ન ત્વાસૌ વેદ ન ત્વં તં કઃ સન્કમનુશોચસિ ॥ ૧૭॥

તૃષ્ણાર્તિ પ્રભવં દુઃખં દુઃખાર્તિ પ્રભવં સુખમ્ ।
સુખાત્સઞ્જાયતે દુઃખમેવમેતત્પુનઃ પુનઃ ।
સુખસ્યાનન્તરં દુઃખં દુઃખસ્યાનન્તરં સુખમ્ ॥ ૧૮॥

સુખાત્ત્વં દુઃખમાપન્નઃ પુનરાપત્સ્યસે સુખમ્ ।
ન નિત્યં લભતે દુઃખં ન નિત્યં લભતે સુખમ્ ॥ ૧૯॥

નાલં સુખાય સુહૃદો નાલં દુઃખાય શત્રવઃ ।
ન ચ પ્રજ્ઞાલમર્થાનાં ન સુખાનામલં ધનમ્ ॥ ૨૦॥

ન બુદ્ધિર્ધનલાભાય ન જાડ્યમસમૃદ્ધયે ।
લોકપર્યાય વૃત્તાન્તં પ્રાજ્ઞો જાનાતિ નેતરઃ ॥ ૨૧॥

બુદ્ધિમન્તં ચ મૂઢં ચ શૂરં ભીરું જડં કવિમ્ ।
દુર્બલં બલવન્તં ચ ભાગિનં ભજતે સુખમ્ ॥ ૨૨॥

ધેનુર્વત્સસ્ય ગોપસ્ય સ્વામિનસ્તસ્કરસ્ય ચ ।
પયઃ પિબતિ યસ્તસ્યા ધેનુસ્તસ્યેતિ નિશ્ચયઃ ॥ ૨૩ ॥

યે ચ મૂઢતમા લોકે યે ચ બુદ્ધેઃ પરં ગતાઃ ।
તે નરાઃ સુખમેધન્તે ક્લિશ્યત્યન્તરિતો જનઃ ॥ ૨૪॥

અન્ત્યેષુ રેમિરે ધીરા ન તે મધ્યેષુ રેમિરે ।
અન્ત્ય પ્રાપ્તિં સુખામાહુર્દુઃખમન્તરમન્તયોઃ ॥ ૨૫॥

યે તુ બુદ્ધિસુખં પ્રાપ્તા દ્વન્દ્વાતીતા વિમત્સરાઃ ।

તાન્નૈવાર્થા ન ચાનર્થા વ્યથયન્તિ કદા ચન ॥ ૨૬॥

અથ યે બુદ્ધિમપ્રાપ્તા વ્યતિક્રાન્તાશ્ચ મૂઢતામ્ ।
તેઽતિવેલં પ્રહૃષ્યન્તિ સન્તાપમુપયાન્તિ ચ ॥ ૨૭॥

નિત્યપ્રમુદિતા મૂઢા દિવિ દેવગણા ઇવ ।
અવલેપેન મહતા પરિદૃબ્ધા વિચેતસઃ ॥ ૨૮॥

સુખં દુઃખાન્તમાલસ્યં દુઃખં દાક્ષ્યં સુખોદયમ્ ।
ભૂતિશ્ચૈવ શ્રિયા સાર્ધં દક્ષે વસતિ નાલસે ॥ ૨૯॥

સુખં વા યદિ વા દુઃખં દ્વેષ્યં વા યદિ વા પ્રિયમ્ ।
પ્રાપ્તં પ્રાપ્તમુપાસીત હૃદયેનાપરાજિતઃ ॥ ૩૦॥

શોકસ્થાન સહસ્રાણિ હર્ષસ્થાન શતાનિ ચ ।
દિવસે દિવસે મૂઢમાવિશન્તિ ન પણ્ડિતમ્ ॥ ૩૧॥

બુદ્ધિમન્તં કૃતપ્રજ્ઞં શુશ્રૂસુમનસૂયકમ્ ।
દાન્તં જિતેન્દ્રિયં ચાપિ શોકો ન સ્પૃશતે નરમ્ ॥ ૩૨॥

એતાં બુદ્ધિં સમાસ્થાય ગુપ્તચિત્તશ્ચરેદ્બુધઃ ।
ઉદયાસ્તમયજ્ઞં હિ ન શોકઃ સ્પ્રસ્તુમર્હતિ ॥ ૩૩॥

યન્નિમિત્તં ભવેચ્છોકસ્ત્રાસો વા દુઃખમેવ વા ।
આયાસો વા યતોમૂલસ્તદેકાઙ્ગમપિ ત્યજેત્ ॥ ૩૪॥

યદ્યત્ત્યજતિ કામાનાં તત્સુખસ્યાભિપૂર્યતે ।
કામાનુસારી પુરુષઃ કામાનનુ વિનશ્યતિ ॥ ૩૫॥

યચ્ચ કામસુખં લોકે યચ્ચ દિવ્યં મહત્સુખમ્ ।
તૃષ્ણા ક્ષયસુખસ્યૈતે નાર્હતઃ સોદશીં કલામ્ ॥ ૩૬॥

પૂર્વદેહકૃતં કર્મ શુભં વા યદિ વાશુભમ્ ।
પ્રાજ્ઞં મૂઢં તથા શૂરં ભજતે યાદૃશં કૃતમ્ ॥ ૩૭॥

એવમેવ કિલૈતાનિ પ્રિયાણ્યેવાપ્રિયાણિ ચ ।
જીવેષુ પરિવર્તન્તે દુઃખાનિ ચ સુખાનિ ચ ॥ ૩૮॥

તદેવં બુદ્ધિમાસ્થાય સુખં જીવેદ્ગુણાન્વિતઃ ।
સર્વાન્કામાઞ્જુગુપ્સેત સઙ્ગાન્કુર્વીત પૃષ્ઠતઃ ।
વૃત્ત એષ હૃદિ પ્રૌધો મૃત્યુરેષ મનોમયઃ ॥ ૩૯॥

યદા સંહરતે કામાન્કૂર્મોઽઙ્ગાનીવ સર્વશઃ ।
તદાત્મજ્યોતિરાત્મા ચ આત્મન્યેવ પ્રસીદતિ ॥ ૪૦॥

કિં ચિદેવ મમત્વેન યદા ભવતિ કલ્પિતમ્ ।
તદેવ પરિતાપાર્થં સર્વં સમ્પદ્યતે તદા ॥ ૪૧॥

ન બિભેતિ યદા ચાયં યદા ચાસ્માન્ન બિભ્યતિ ।
યદા નેચ્છતિ ન દ્વેષ્ટિ બ્રહ્મ સમ્પદ્યતે તદા ॥ ૪૨॥

ઉભે સત્યાનૃતે ત્યક્ત્વા શોકાનન્દૌ ભયાભયે ।
પ્રિયાપ્રિયે પરિત્યજ્ય પ્રશાન્તાત્મા ભવિષ્યસિ ॥ ૪૩ ॥

યદા ન કુરુતે ધીરઃ સર્વભૂતેષુ પાપકમ્ ।
કર્મણા મનસા વાચા બ્રહ્મ સમ્પદ્યતે તદા ॥ ૪૪॥

યા દુસ્ત્યજા દુર્મતિભિર્યા ન જીર્યતિ જીર્યતઃ ।
યોઽસૌ પ્રાણાન્તિકો રોગસ્તાં તૃષ્ણાં ત્યજતઃ સુખમ્ ॥ ૪૫॥

અત્ર પિઙ્ગલયા ગીતા ગાથાઃ શ્રૂયન્તિ પાર્થિવ ।
યથા સા કૃચ્છ્રકાલેઽપિ લેભે ધર્મં સનાતનમ્ ॥ ૪૬॥

સઙ્કેતે પિઙ્ગલા વેશ્યા કાન્તેનાસીદ્વિનાકૃતા ।
અથ કૃચ્છ્રગતા શાન્તાં બુદ્ધિમાસ્થાપયત્તદા ॥ ૪૭॥

પિન્ગલા

ઉન્મત્તાહમનુન્મત્તં કાન્તમન્વવસં ચિરમ્ ।
અન્તિકે રમણં સન્તં નૈનમધ્યગમં પુરા ॥ ૪૮॥

એકસ્થૂનં નવદ્વારમપિધાસ્યામ્યગારકમ્ ।
કા હિ કાન્તમિહાયાન્તમયં કાન્તેતિ મન્સ્યતે ॥ ૪૯॥

અકામાઃ કામરૂપેણ ધૂર્તા નરકરૂપિણઃ ।
ન પુનર્વઞ્ચયિષ્યન્તિ પ્રતિબુદ્ધાસ્મિ જાગૃમિ ॥ ૫૦॥

અનર્થોઽપિ ભવત્યર્થો દૈવાત્પૂર્વકૃતેન વા ।
સમ્બુદ્ધાહં નિરાકારા નાહમદ્યાજિતેન્દ્રિયા ॥ ૫૧॥

સુખં નિરાશઃ સ્વપિતિ નૈરાશ્યં પરમં સુખમ્ ।
આશામનાશાં કૃત્વા હિ સુખં સ્વપિતિ પિઙ્ગલા ॥ ૫૨॥

ભીષ્મોવાચ

એતૈશ્ચાન્યૈશ્ચ વિપ્રસ્ય હેતુમદ્ભિઃ પ્રભાષિતૈઃ ।
પર્યવસ્થાપિતો રાજા સેનજિન્મુમુદે સુખમ્ ॥ ૫૩ ॥

॥ ઇતિ પિઙ્ગલાગીતા સમાપ્તા ॥

Adhyaya number 168 in shAntiparva, Mahabharata critical edition

(Bhandarkar Oriental Research Institute BORI).
In Kinjavadekar's edition it is 174.

Another possible source of pi.ngalA gItA is Bhagavata Purana 11:8:30-44 ( a part of Uddhava Gita)

Encoded and proofread by Sunder Hattangadi sunderh at hotmail.com

.. pingalAgItA ..
was typeset on August 2, 2016

Please send corrections to *sanskrit@cheerful.com*